# Shri Hanumatkrita Shrirama Stutih

# શ્રીહનુમત્કૃતા શ્રીરામસ્તુતિઃ

## Document Information

Text title : Ramastutih Hanumatkrita 8

File name : rAmastutiHhanumatkRRitA.itx

Category : raama

Location : doc_raama

Transliterated by : Prabhav Tengse

Proofread by : Prabhav Tengse

Description/comments : Skandapurana 46| 31-49

Latest update : February 25, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 15, 2023

*sanskritdocuments.org*

# શ્રીહનુમત્કૃતા શ્રીરામસ્તુતિઃ

નમો રામાય હરયે વિષ્ણવે પ્રભવિષ્ણવે ।
આદિદેવાય દેવાય પુરાણાય ગદાભૃતે ॥ ૧॥

વિષ્ટરે પુષ્પકે નિત્યં નિવિષ્ટાય મહાત્મને ।
પ્રહૃષ્ટ વાનરાનીક જુષ્ટ પાદામ્બુજાયતે ॥ ૨॥

નિષ્પિષ્ટ રાક્ષસેન્દ્રાય જગદિષ્ટ વિધાયિને ।
નમઃ સહસ્ર શિરસે સહસ્ર ચરણાય ચ ॥ ૩॥

સહસ્રાક્ષાય શુદ્ધાય રાઘવાય ચ વિષ્ણવે ।
ભક્તાર્તિ હારિણે તુભ્યં સીતાયાઃ પતયે નમઃ ॥ ૪॥

હરયે નારસિંહાય દૈત્યરાજ વિદારિણે ।
નમસ્તુભ્યં વરાહાય દંષ્ટ્રોદ્ધૃત વસુન્ધરે ॥ ૫॥

ત્રિવિક્રમાય ભવતે બલિ યજ્ઞ વિભેદિને ।
નમો વામન રૂપાય નમો મન્દર ધારિણે ॥ ૬॥

નમસ્તે મત્સ્ય રૂપાય ત્રયી પાલન કારિણે ।
નમઃ પરશુરામાય ક્ષત્રિયાન્ત કરાય તે ॥ ૭॥

નમસ્તે રાક્ષસઘ્નાય નમો રાઘવ રૂપિણે ।
મહાદેવ મહાભીમ મહાકોદણ્ડ ભેદિને ॥ ૮॥

ક્ષત્રિયાન્તકરક્રૂર ભાર્ગવ ત્રાસ કારિણે ।
નમોઽસ્ત્વ હિલ્યાસન્તાપ હારિણે ચાપ હારિણે ॥ ૯॥

નાગાયુત વલોપેત તાટકા દેહ હારિણે ।
શિલા કઠિન વિસ્તાર વાલિવક્ષો વિભેદિને ॥ ૧૦॥

નમો માયા મૃગધ્વંસ કારિણેઽજ્ઞાન હારિણે ।
દશસ્યન્દન દુઃખાબ્ધિ શોષણાગસ્ત્ય રૂપિણે ॥ ૧૧॥

અનેકોર્મિ સમાધૂત સમુદ્રમદ હારિણે ।
મૈથિલી માનસામ્ભોજ ભાનવે લોક સાક્ષિણે ॥ ૧૨॥

રાજેન્દ્રાય નમસ્તુભ્યં જાનકી પતયે હરે ।
તારક બ્રહ્મણે તુભ્યં નમો રાજીવ લોચન ॥ ૧૩॥

રામાય રામ ચન્દ્રાય વરેણ્યાય સુખાત્મને ।
વિશ્વામિત્ર પ્રિયાયેદં નમઃ ખર વિદારિણે ॥ ૧૪॥

પ્રસીદ દેવ દેવેશ ભક્તાનામભયપ્રદ ।
રક્ષ માં કરુણા સિન્ધો રામચન્દ્ર નમોસ્તુતે ॥ ૧૫॥

રક્ષ માં વેદ વચસામપ્યગોચર રાઘવ ।
પાહિમાં કૃપયા રામ શરણં ત્વામુપૈમ્યહમ્ ॥ ૧૬॥

રઘુવીર મહામોહમપાકુરુ મમાધુના ।
સ્નાને ચાચમને ભુક્તૌ જાગ્રત્સ્વપ્ન સુષુપ્તિષુ ॥ ૧૭॥

સર્વાવસ્થાસુ સર્વત્ર પાહિમાં રઘુનન્દન ।
મહિમાનં તવસ્તોતું કઃ સમર્થો જગત્રયે ॥ ૧૮॥

ત્વમેવ ત્વન્મહત્ત્વં વૈ જાનાસિ રઘુનન્દન ।
અતસ્તે શરણં યામિ સર્વભાવેન સર્વદા ॥ ૧૯॥

ઇતિ સ્કન્દપુરાણાન્તર્ગતા શ્રીહનુમત્કૃતા શ્રીરામસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Prabhav Tengse

*Shri Hanumatkrita Shrirama Stutih*

pdf was typeset on July 15, 2023

Please send corrections to *sanskrit@cheerful.com*